# Sakhyopanishat

# सख्योपनिषत्

## Document Information

Text title : Sakhyopanishad

File name : sakhyopaniShat.itx

Category : upanishhat

Location : doc_upanishhat

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Atharva Shruti (Pippaladeeya Shakha) It explains supremacy of Sakhya Bhava between Paramatma Sri Ramachandra and Jivatma who is Ramasakhaa.

Latest update : August 30, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 31, 2024

*sanskritdocuments.org*

# सख्योपनिषत्

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥ १॥

ॐ शान्तिः ।
ॐ क्वचित्समये सनकादयश्शेषं प्रति जग्मुः ।
कथं नु भगवन् पुरुषं वेदज्ञा भक्त्या पश्यन्ति
प्राप्नुवन्ति तेन सह क्रीडन्ति ।
सहोवाच ।
सख्यरसेनैव ॥ २॥

श्रुत्वा पुनरूचुः ।
भगवन् क्व स रसः प्राकृतोऽप्राकृतो वा ।
सहोवाच ।
अप्राकृतः प्रकृतिपरश्च सख्यस्यैव बहूनि पर्यायनामानि सन्ति ॥ ३॥

विश्वासः श्रद्धा श्रद्धाविश्वासः प्रकृतिः ।
सत्यंज्ञानमनन्तं ब्रह्म तद्ब्रह्म सख्यरसात्मकः ।
श्रीराम एव रसोवैसः ॥ ४॥

यस्यदासरसोवैपादः ॥ ५॥

यस्य शान्तरसो वै शिरः ॥ ६॥

वात्सल्यः प्राणः ॥ ७॥

शृङ्गारो बाहू ॥ ८॥

सख्यात्मा ॥ ९॥

सख्यरसाज्जायन्ते परव्यूहविभवान्तर्य्याम्यर्चावताराः ।
सख्यरसान्महाविष्णुर्जायते ।

सख्यरसान्महाब्रह्मा जायते ।
सख्यरसान्महारुद्रो जायते ।
सख्यरसात्परमात्मा जायते ।
सख्यरसान्महालक्ष्मीर्जायते ।
सख्यरसान्महामायाजायते ।
सख्यरसादाद्याशक्तिर्जायते ।
सख्यरसात्सखा जायते ।
सख्यरसाद्वासुदेवो जायते ।
सख्यरसात्क्षीरशायी जायते ।
सख्यरसात्सर्वेश्वराः जायन्ते ।
सध्यरसात्सर्वेऽवताराः जायन्ते ।
सख्यरसान्नृसिंहो जायते ।
सख्यरसाद्वराहो जायते ।
सख्यरसान्मत्स्यकच्छपौ जायेते ।
सख्यरसात्कल्किबौद्धौ जायेते ।
सख्यरसाद्वामनो जायते ।
सख्यरसात्परशुरामो जायते ।
सख्यरसाच्छ्रीकृष्णो जायते ।
सख्यरसाद्बलरामो जायते ।
सख्यरसाद्विष्णुर्जायते ।
सख्यरसान्महादेवो जायते ।
सख्यरसाद्ब्रह्मा जायते ।
सख्यरसान्महेन्द्रो जायते ।
सख्यरसादिन्द्रो जायते ।
सख्यरसात्सर्वेदेवाः जायन्ते ।
सख्यरसात्सर्वाः शक्तयो जायन्ते ।
सख्यरसाच्छेषो जायते ।
सख्यरसाद्गणेशो जायते ।
सख्यरसाद्वरुणो जायते ।
सख्यरसात्सोमो जायते ।
सख्यरसादग्निर्जायते ।
सख्यरसात्सूर्यो जायते ।

सख्यरसाद्यमो जायते ।
सख्यरसात्कल्पवृक्षो जायते ।
सख्यरसात्कामो जायते सख्यरसात्कामधेनुर्जायते ।
सख्यरसाद्धनदो जायते ।
सख्यरसात्सर्वैमरूताः जायन्ते ।
सख्यरसात्सर्वै गन्धर्वाः जायन्ते ।
सख्यरसात्सर्वैविद्याधराः जायन्ते ।
सख्यरसात्सर्वैवेदाः जायन्ते ।
सख्यरसात्सर्वोपनिषदो जायन्ते ।
सख्यरसात्सर्वैमन्त्राः जायन्ते ।
सख्यरसात्सर्वैसिद्धाः जायन्ते ।
सख्यरसात्पञ्च महाभूतानि जायन्ते ।
सख्यरसात्सर्वै जडचेतनाःजायन्ते ।
अतो ब्रह्मवित्सर्वं स्त्रीपुन्नपुंसकात्मकं विश्वं सख्यात्मकं पश्यति ।
यस्मादितरन्नकिञ्चिदिति ।
नित्यभेदम् । नित्योऽभेदो । नित्योऽभेदो ।
नित्योऽभेदो विवेचनीयोब्रह्मविद्भिः ।

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

इत्यथर्वणवेदीय पिप्पलीय शाखायां सख्योपनिषत् समाप्ता ।

From Atharva Shruti (Pippaladeeya Shakha)
It explains supremacy of Sakhya Bhava
between Paramatma Sri Ramachandra and
Jivatma who is Ramasakhaa.

Encoded and proofread by Mrityunjay Rajkumar Pandey

*Sakhyopanishat*

pdf was typeset on August 31, 2024

Please send corrections to *sanskrit@cheerful.com*